# ॥ गायत्रीकवचम् ३ ॥

.. gAyatrIkavacham 3 ..

sanskritdocuments.org

August 20, 2017

# .. gAyatrIkavacham 3 ..

# ॥ गायत्रीकवचम् ३ ॥

## Sanskrit Document Information

Text title : gAyatrIkavacham 3

File name : gAyatrIkavacham3.itx

Category : kavacha, devii, gAyatrI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : NA

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : February 4, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ गायत्रीकवचम् ३ ॥

श्रीगणेशाय नमः ॥

श्रीपार्वत्युवाच ।
देवदेव महादेव संसारार्णवतारकम् ।
गायत्रीकवचं देव कृपया कथय प्रभो ॥ १॥

श्रीमहादेव उवाच ।
मूलाधारे स्थिता नित्यं कुण्डली तत्त्वरूपिणी ।
सूक्ष्मातिसूक्ष्मपरमा बिसतन्तुस्वरूपिणी ॥ २॥

विद्युत्पुञ्जप्रतीकाशा कुण्डली श्रुतिसर्पिणी ।
परस्य ब्रह्मग्रहणी पञ्चाशद्वर्णरूपिणी ॥ ३॥

शिवस्य नर्तकी नित्या परब्रह्मप्रपूजिता ।
ब्राह्मणस्यैव गायत्री चिदानन्दस्वरूपिणी ॥ ४॥

ब्रह्मण्यवर्त्मवातेयं प्राणात्मा नित्यनूतनात् ।
नित्यं तिष्ठति सानन्दा कुण्डली तव विग्रहे ॥ ५॥

अतिगोप्यं महत्पुण्यं त्रिकोटीतीर्थसंयुतम् ।
सर्वज्ञानमयी देवी सर्वदानमयी सदा ॥ ६॥

सर्वसिद्धिमयी देवी पार्वती प्राणवल्लभा ।
ॐ ॐ ॐ ॐ भूः ॐ ॐ भुवः ॐ ॐ स्वः ॐ ॐ त ॐ ॐ त्स
ॐ ॐ वि ॐ ॐ तु ॐ ॐ व ॐ ॐ रे ॐ ॐ ण्यं ॐ ॐ भ
ॐ ॐ र्गो ॐ ॐ दे ॐ ॐ व ॐ ॐ स्य ॐ ॐ धी ॐ ॐ म
ॐ ॐ हि ॐ ॐ धि ॐ ॐ यो ॐ ॐ यो ॐ ॐ नः ॐ ॐ प्र
ॐ ॐ चो ॐ ॐ द ॐ ॐ यात् ॐ OM । ॐ भूःॐ

पातु मे मूलं चतुर्दलसमन्वितम् ।
ॐ भुवः ॐ पातु मे लिङ्गं सजलं षड्दलात्मकम् ॥ ७॥

ओं स्वः ॐ पातु मे कण्ठं सकाशां दलषोडशम् ।
ॐ त ॐ पातु मे रूपं ब्रह्माणं कारणं परम् ॥ ८॥

ॐ त्स ॐ पातु मे ब्रह्माणं पातु सदा मम ।

ॐ वि ॐ पातु मे गन्धं सदा शिशिरसंयुतम् ॥ ९॥

ॐ तु ॐ पातु मे स्पर्शं शरीरस्य च कारणम् ।
ॐ र्वे ॐ पातु मे शब्दं शब्दविग्रहकारणम् ॥ १०॥

ॐ रे ॐ पातु मे नित्यं सदा तत्त्वशरीरकम् ।
ॐ ण्यं ॐ पातु मे ह्यक्षं सर्वतत्त्वैककारणम् ॥ ११॥

ओं भ ॐ पातु मे श्रोत्रं श्रवणस्य च कारणम् ।
ॐ र्गो ॐ पातु मे घ्राणं गन्धोपादानकारणम् ॥ १२॥

ॐ दे ॐ पातु मे वास्यं सभायां शब्दरूपिणी ।
ॐ व ॐ पातु मे बाहुयुगलं ब्रह्मकारणम् ॥ १३॥

ॐ स्य ॐ पातु मे लिङ्गं षड्दलं षड्दलैर्युरतम् ।
ॐ धी ॐ पातु मे नित्यं प्रकृतिं शब्दकारणम् ॥ १४॥

ॐ म ओं पातु मे नित्यं मनोब्रह्मस्वरूपिणम् ।
ॐ हि ॐ पातु मे बुद्धिं परब्रह्ममयं सदा ॥ १५॥

ॐ धिय ॐ पातु मे नित्यमहङ्कारं यथा तथा ।
ॐ यो ॐ पातु मे नित्यं जलं सर्वत्र सर्वदा ।
ॐ नः ॐ पातु मे नित्यं तेजःपुञ्जो यथा तथा ॥ १६॥

ॐ प्र ॐ पातु मे नित्यमनिलं कार्यकारणम् ।
ॐ चो ॐ पातु मे नित्यमाकाशं शिवसन्निभम् ॥ १७॥

ॐ द ॐ पातु मे जिह्वां जपयज्ञस्य कारणम् ।
ॐ यात् ॐ मे नित्यं शिवज्ञानमयं सदा ॥ १८॥

तत्त्वानि पातु मे नित्यं गायत्री परदैवतम् ।
कृष्णा मे सततं पातु ब्रह्माणी भूर्भुवःस्वरोम् ॥ १९॥

ॐ अस्य श्रीगायत्रीकवचस्य परब्रह्म ऋषिः
ऋग्यजुःसामाथर्वाणश्छन्दांसि, ब्रह्मा देवता,
धर्मार्थकाममोक्षार्थं जपे विनियोगः ॥

ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।

कामक्रोधादिकं सर्वं स्मरणाद्याति दूरतः ।
इदं कवचमज्ञात्वा ब्रह्मविद्यां जपेद्यदि ॥ २०॥

शतकोटिजपेनापि न सिद्धिर्जायते प्रिये ।
गायत्रीकवचात्सर्वं स्मरणात्सिध्यति ध्रुवम् ॥ २१॥

पत्वाठि कवचं विप्रो गायत्रीं सकृदुच्चरेत् ।
सर्वपापविनिर्मुक्तो जीवन्मुक्तो भवेद्द्विजः ॥ २२॥

इदं कवचमज्ञात्वा त्वन्यद्यः कवचं पठेत् ।
सर्वं तस्य वृथा देवि त्रैलोक्यमङ्गलादिकम् ॥ २३॥

गायत्री वचं यस्य जिह्वायां विद्यते सदा ।
तदाऽमृतमयी जिह्वा पवित्रा जपपूजने ॥ २४॥

इदं कवचमज्ञात्वा ब्रह्मविद्यां जपेद्यदि ।
व्यर्थं भवति चार्वङ्गि तज्जपो वनरोदनम् ॥ २५॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्यस्य स्मरणाद्यान्ति दूरतः ॥ २६॥

नश्वरं मांसमेदोऽस्थिमज्जाशुक्रविनिर्मितम् ॥ २७॥

वातपित्तकफैर्युक्तं स्थूलदेहं तदुच्यते ।
सूक्ष्मं ज्योतिर्मयं देहं पञ्चभूतात्मकं विदुः ॥ २८॥

महापद्मवनान्तस्थं सर्वावयवसंयुतम् ।
आधारदेहसम्बन्धाद्गायत्री ब्रह्मणः स्वयम् ॥ २९॥

एतदेव परं ब्रह्म कथिते उभयात्मके ।
ब्राह्मणस्यैव जीवात्मा गायत्रीसहितो वपुः ॥ ३०॥

आत्मनां हृदयाम्भोजे प्रदीपकलिकोपमम् ।
निर्धूमं च यथा ज्योतिस्तैलाग्निवर्तियोगतः ॥ ३१॥

तज्ज्योतिः परमं ब्रह्म शुभदं नात्र संशयः ।
गायत्रीकवचं न्यासं मातृकास्थानसन्धिषु ॥ ३२॥

स कृत्वा ब्राह्मणश्रेष्ठ चान्यन्यासं समाचरेत् ।
अन्यन्यासे तथा सिद्धिरन्यथायाऽरण्यरोदनम् ॥ ३३॥

गायत्रीन्यासमात्रेण परब्रह्ममयो द्विजः ।
इदं कवचमज्ञात्वा ब्रह्मचर्यं करोति यः ॥ ३४॥

ब्रह्मचर्यं भवेद्व्यर्थं गायत्रीकवचं विना ।
कवचस्य प्रसादेन ब्राह्मणो ज्वलदग्निवत् ॥ ३५॥

कवचं परमेशानि सृष्टिस्थितिलयात्मकम् ।
कवचं ब्राह्मण इदं प्रातरुत्थाय यः पठेत् ॥ ३६॥

गायत्रीं स सकृत्स्मृत्वा जपलक्षफलं भवेत् ।
गायत्रीं दशधा जप्त्वा दशलक्षफलं भवेत् ॥ ३७॥

एवं क्रमेण गायत्रीं शतधा प्रजपेद्यदि ।
शतलक्षफलं प्राप्य विहरेद्देववद्भुवि ॥ ३८
सूर्येन्दोर्ग्रहणे चेदं पठित्वा कवचं द्विजः ।
सकृद्यदि जपेद्विद्यां गायत्रीं परमाक्षराम् ॥ ३९॥

तत्क्षणात्तु भवेत्सिद्धो ब्रह्मसायुज्यमाप्नुयात् ।
इदं कवक्षमज्ञात्वा गायत्रीं प्रजपेत्तु यः ॥ ४०॥

जप एव वृथा तस्य निस्तेजो न च सिद्धिदः ।
यः पठेत्कवचं देवि सततं शिवसन्निधौ ॥ ४१॥

विष्णुदेवस्य कवचं प्रजपेच्छक्तिसन्निधौ ।
तेजःपुञ्जमयो विप्रस्तत्क्षणाज्जायते ध्रुवम् ॥ ४२॥

इति श्रीरुद्रयामले पार्वतीश्वरसंवादे गायत्रीकवचं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. gAyatrIkavacham 3 ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*